"प्रसूत्याश्च तथा दक्षश्चतस्रो विंशतिस्तथा ।
ससर्ज्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु ॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयो-
दशी ॥
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥")
मातृकाविशेषः । इति भवदेवभट्टः ॥ (शक्ति-विशेषः । यथा, देवीभागवते । १ । १५ । ६१ ।
"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च शक्तयः ।
संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक्
पृथक् ॥")

तुष्टुः, पुं, (तुष + बाहुलकात् तुक् ।) कर्ण-मणिः । इति शब्दचन्द्रिका ॥

तुस, ध्वाने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) तोसति । इति दुर्गादासः ॥

तुसः, पुं, (तुषः । पृषोदरादित्वात् सत्वम् ।) तुषः । इत्यमरटीकायां रमानाथः ॥

तुस्तं, क्ली, धूलिः । इति लिङ्गादिसंग्रहे युक्तशब्द-टीकायां सारसुन्दरी ॥

तुह, इर् अर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) इर्, अतुहत् अतोहीत् । अर्द्दनमिह वधः । इति दुर्गादासः ॥

तुहिनं, क्ली, (तोहति अर्द्दति तुह्यतेऽनेनेति वा । तुह + "वेपितुह्योर्ह्रस्वश्च ।" उणां । २ । ५२ । इति इनन् गुणे कृते ह्रस्वश्च ।) हिमम् । इत्य-मरः । १ । ३ । १८ ॥ (यथा, आर्य्यासप्त-शत्याम् । ६३२ ।
"सा श्यामा तन्वङ्गी दहता शीतोपचारतीव्रेण ।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्व्वेव ॥")
चन्द्रतेजः । इत्युणादिकोषः ॥ (यथा, पञ्च-तन्त्रे । २ । ५८ ।
"किं चन्दनैः सकर्पूरैस्तुहिनैः शीतलैश्च किम् ।
सर्व्वे ते मित्रगात्रस्य कलां नार्हन्ति षोड़शीम् ॥"
शीतले, त्रि । यथा, आर्य्यासप्तशत्याम् । ३६६ ।
"प्रसरतु शरत्त्रियामा जगन्ति धवलयतु धाम
तुहिनांशोः ।
पञ्जरचकोरिकायां कणिकाकल्पोऽपि न
विशेषः ॥")

तुहिनांशुतैलं, क्ली, (तुहिनांशोः कर्पूरस्य तैलम् ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

तूड, ऋ अनादरे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) षष्ठस्वरी । ऋ, अतुतूड़त् । इति दुर्गादासः ॥

तूण, क सङ्कोचे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) दन्त्यवर्गाद्यादिः । क, तूणयति चक्षुः सङ्कुचितं स्यादित्यर्थः । इति दुर्गादासः ॥

तूण, क ङ पूरणे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ङ, तूणयते । इति दुर्गा-दासः ॥

तूण, तु क सङ्कोचे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-अकं-सेट् ।) दीर्घी ऋद्धन्त्योपधः । अतुतूणत् । इति दुर्गादासः ॥

तूणः, पुं स्त्री, (तूण्यते पूर्य्यते बाणैरिति । तूण + पूरणे घञ् ।) बाणाधारः । तत्पर्य्यायः । उपा-सङ्गः २ तूणीरः ३ निषङ्गः ४ इषुधिः ५ । इत्य-मरः । २ । ८ । ८८ ॥ तूणी ६ । इति शब्द-रत्नावली ॥ (यथा, महाभारते । ३ । १७ । ३ ।
"तूणखड्गधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥")

तूणकं, क्ली, (तूणयति सङ्कुचितं भवति समा-निकापदद्वयमिति । तूण + ण्वुल् ।) छन्दो-विशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"तूणकं समानिकापदद्वयं विनान्तिमम् ॥"

तूणी, स्त्री, (तूण्यते पूर्य्यते बाणैरिति । तूण + कर्म्मणि घञ् । गौरादित्वात् ङीष् ।) तूणः । इति शब्दरत्नावली ॥ (यथा, रघुः । ९ । ५६ ।
"तूणीमुखोद्धृतशरेण विशीर्णपङ्क्तिः ॥"
वेदनाविशेषः । यथा, सुश्रुते निदानस्थाने १ अध्याये ।
"अधो या वेदना याति वर्च्चोमूत्राशयोत्थिता ।
भिन्दन्तीव गुदोपस्थं सा तूणीत्यपदिश्यते ॥")

तूणी, [न्] पुं, (तूणवदाकृतिरस्त्यस्येति । तूण + इनिः ।) नन्दीवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"तूणी तुन्नक आपीनस्तुणिकः कच्छकस्तथा ।
कुठेरकः कान्तलको नन्दिवृक्षश्च नन्दकः ॥"
गुणाश्चास्य यथा,—
"तुणी रक्तः कटुः पाके कषायो मधुरो लघुः ।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्त-
जित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तूणयुक्ते, त्रि ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । १८ । ३५ ।
"आरुह्य भगवान् विष्णुर्गरुड़ं पक्षिपुङ्गवम् ।
शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणी तनुत्र-
वान् ॥")

तूणीकः, पुं, (तूणी तूण इव कायतीति । कै + कः ।) नन्दीवृक्षः । इति राजनिर्घण्टः ॥

तूणीरः, पुं, (तूण्यते पूर्य्यते बाणैरिति । तूण + बाहुलकात् ईरन् ।) तूणः । इत्यमरः । २ । ८ । ८८ ॥ (यथा, महाभारते । ७ । २८ । १६ ।
"तस्य पार्थो धनुश्छित्त्वा तूणीरान् सन्निकृत्य च ।
नाराचैर्व्वित्रिसप्तत्या सर्व्वमर्म्मस्वताड़यत् ॥"
क्लीवलिङ्गेऽपि दृश्यते । यथा, तत्रैव । ६ । ५१ । ५१ ।
"तूणीराण्यथ चर्म्माणि विविधानि धनूंषि च ॥")

तूतकं, क्ली, तुत्थम् । इतिशब्दचन्द्रिका ॥ तुतिया इति भाषा ॥ (तुत्थशब्देऽस्य गुणादिकं ज्ञात-व्यम् ॥)

तूदः, पुं, (तुदतीति । तुद व्यथने + "इगुपधेति ।" ३ । १ । १३५ । इति कः । पृषोदरादित्वात् दीर्घः ।) तूलवृक्षः । इति राजनिर्घण्टः ॥

तूर, य ङ ई हिंसे । वेगे । इति कविकल्पद्रुमः । (दिवां-आत्मं-सकं-वेगे अकं-सेट् ।) य ङ, तूर्य्यते । ई, तूर्णः । इति दुर्गादासः ॥

तूरं, क्ली, (तूर्य्यते ताड्यते इति । तूर + घञ् ।) वाद्यम् । इति हेमचन्द्रः । २ । २०० ॥

तूरी, स्त्री, (तूरं वाद्यविशेषस्तदाकृतिः पुष्पादौ अस्त्यस्येति । तूर + अच् । गौरादित्वात् ङीष् ।) धुस्तूरवृक्षः । इति भावप्रकाशः ॥

तूर्णं, क्ली, (त्वर सम्भ्रमे + क्तः । पक्षे इड़भावः "ज्वरत्वरेति ।" ६।४।२० । इत्यूट् । "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ । इति तस्य नः ।) शीघ्रम् । (यथा, देवीभाग-वते । १ । १० । ३१ ।
"तां दृष्ट्वा चपलापाङ्गीं समीपस्थां वराप्सराम् ।
पञ्चबाणपरीताङ्गस्तूर्णमासीद्धृतव्रतः ॥")
तद्वति, त्रि । इत्यमरः । १ । २ । ६८ ॥

तूर्णिः, पुं, (त्वरते त्वरणं वा । त्वर + "वहिश्रिश्रु-युद्रुग्लाहात्वरिभ्यो नित् ।" उणां । ४ । ५१ । इति निः स च नित् ।) मलम् । इत्युणादि-कोषः । २ । १४१ ॥ त्वरा । इति हेमचन्द्रः । २ । २३६ ॥ शोकः । मनः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (क्षिप्रे, त्रि । इति निघण्टुः । २ । १५ ॥ यथा, ऋग्वेदे । १० । ८८ । ६ ।
"मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति
प्रजानन् ॥"
"तूर्णिस्त्वरमाणः ।" इति सायनः ॥)

तूर्य्यं, क्ली, (तूर्य्यते ताड्यते इति । तूर् + ण्यत् ।) वाद्यम् । इति हेमचन्द्रः । २ । २८६ ॥ (यथा, महाभारते । १ । ११३ । ४४ ।
"स तूर्य्यशतशङ्खानां भेरीणाञ्च महास्वनैः ।
हर्षयन् सर्व्वशः पौरान् विवेश गजसाह्व-
यम् ॥")

तूर्य्यखण्डः, पुं, (तूर्य्यस्य खण्ड इव ।) द्रगड़वाद्यम् । इति हारावली । २२२ ॥ (क्वचित् तूर्य्यगण्डोऽपि पाठः ॥)

तूल, क ङ पूरणे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) दीर्घी । क ङ, तूलयते । इति दुर्गादासः ॥

तूल, क निष्कर्षे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) दीर्घी । निष्कर्ष इह इयत्ता-परिच्छेदः । क, तूलयति काञ्चनं वणिक् । इति दुर्गादासः ॥ (क्वचित् तूल कि निष्कर्षे इति पाठोऽपि दृश्यते । कि, तूलति तूलयति ॥)

तूलं, क्ली, (तूलयते पूरयति सर्व्वं व्यापकत्वात् । तूल पूरणे + कः ।) आकाशम् । इति मेदिनी । ले, २५ ॥ अश्वत्थाकारवृक्षविशेषः । पलाश-पिपल इति तूत इति च भाषा ॥ तत्पर्य्यायः । तूदः २ ब्रह्मकाष्ठम् ३ ब्रह्मवीरः ४ पूषकः ५ ब्रह्मदारु ६ सुपुष्पम् ७ सुरूपम् ८ नीलवृन्त-कम् ९ क्रमुकः १० विप्रकाष्ठम् ११ मदसारः १२ । इति राजनिर्घण्टः ॥ पूगः १३ । तत्पक्वफल-गुणाः । गुरुत्वम् । स्वादुत्वम् । हिमत्वम् । पित्तानिलनाशित्वञ्च । तदामफलगुणाः । गुरु-त्वम् । सारकत्वम् । अम्लत्वम् । उष्णत्वम् । रक्तपित्तकारित्वञ्च । इति भावप्रकाशः ॥ मधु-